## तृतीयः पाठः

# गणतन्त्रदिवसः

(विद्यालयस्य सभाकक्षे "वन्दे मातरम्" इति राष्ट्रियगीतस्य पूर्वाभ्यासः प्रचलति। तदवसरे शिक्षकः प्रविशति)



**शिक्षकः** – सुप्रभातम्! छात्राः! कथं चलति पूर्वाभ्यासः?

**सर्वे** – गुरवे नमः, सम्यक् प्रचलति। गणतन्त्र-दिवसार्थं राष्ट्रगानं राष्ट्रगीतं च ताल-लयबद्धम् अभ्यस्यामः।

**शिक्षकः** – उत्तमम्! देशभक्तिपराणि अन्यान्यगीतानि अपि प्रस्तोतुं प्रभवन्ति।

**श्यामला** – गुरो! भाषणार्थं भवतः मार्गदर्शनम् आवश्यकम्।

**शिक्षकः** – निस्सङ्कोचं पृच्छतु। यदहं जानामि तत्कथयामि।

**ज्योत्स्ना** – गणतन्त्रदिवसः स्वतन्त्रादिवस इव राष्ट्रियं-पर्व किल?

**शिक्षकः** – आम्, जनवरिमासस्य षड्विंशे दिनाङ्के (26 जनवरी) भारतीयाः वयं गणतन्त्रदिवसम् उत्साहेन आयोजयामः।

**राजेशः** – अस्मिन् पर्वणि दिल्लीनगरे स्थलसेना-जलसेना-वायुसेनानां पथचलनादिकम् अद्भुतं चित्ताकर्षकं च भवतीति श्रुतं मया।



**सुहासिनी** – गुरो! अत्र महोत्सवे वायुसेनायाः जेट्विमानानि उड्डयन्ते, वर्णरञ्जितधूमं च निस्सारयन्ति इति श्रुतं मया।

**शिक्षकः** – सत्यम्! गणतन्त्रदिवसे भारतस्य राष्ट्रपतिः स्थल-जल-वायुसेनानायकानाम् अभिवन्दनं स्वीकरोति

एवं विभिन्नराज्येषु तत्तद्राज्यपालाः प्रातिनिध्यं वहन्ति। विविधप्रान्तेभ्यः समागताः कलाकाराः सांस्कृतिककार्यक्रमैः जानपदनृत्यैः च जनमनांसि रञ्जयन्ति।



नरेशः – गुरो! गणतन्त्रम् इत्यस्य कोऽर्थः?

शिक्षकः – समुचितः प्रश्नः, भारतं स्वशासनाधारेण रचितानां राज्यानां गणरूपं वर्तते। राज्यस्तरे प्रादेशिकं शासनं, राष्ट्रियस्तरे गणतन्त्रम् एकरूपं प्रवर्तते।

श्यामला – गुरो! अस्य पर्वणः ऐतिहासिकं महत्त्वं ज्ञातुम् इच्छामि।

शिक्षकः – अहं विस्तरेण वदामि। परतन्त्रताकाले 31-12-1929 दिनाङ्कतः 01-01-1930 दिनाङ्कं यावत् तात्कालिक काङ्ग्रेससंस्थायाः लाहौरनगरे अधिवेशनम् अभवत्। तस्मिन् अधिवेशने 'सर्वैः राष्ट्रनायकैः सार्वभौमतन्त्रं रचयामः' इति प्रतिज्ञा कृता। लाहौराधिवेशने राष्ट्रभक्तैः त्रिवर्णध्वजारोहणम् अपि कृतम्। भारतीयानाम् अयं प्रतिज्ञास्वप्नः 1947 तमे वर्षे अगस्तमास्य पञ्चदश दिनाङ्के पूर्णतां गतः। देशः स्वतन्त्रः अभवत्। तदारभ्य प्रतिवर्षं 15 अगस्तदिने वयं स्वतन्त्रतादिवसम् आयोजयामः। अनन्तरं 26 जनवरी 1950 तमे वर्षे अस्माकं संविधानं प्रारब्धम् इति कारणतः प्रतिवर्षेऽस्मिन् दिने समग्रे राष्ट्रे वयं गणतन्त्रदिवसम् आचरामः।

सर्वे – धन्यवादाः, अस्माभिः स्वतन्त्रतादिवसस्य, गणतन्त्रदिवसस्य च महत्त्वं ज्ञातम्।

शिक्षकः – स्वस्ति! सर्वेभ्यः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| सुप्रभातम् | — सुबह का नमस्कार | मार्गदर्शनम् | — निर्देश |
| ताल-लयबद्धम् | — गान की धुन से युक्त/ ताल और लय से युक्त | चित्ताकर्षकम् | — मन को आकर्षित करने वाला |
| अभ्यस्यामः | — हम अभ्यास करते हैं | भाषाधारेण | — भाषा के आधार से |
| देशभक्तिपराणि | — देशभक्ति से युक्त | त्रिवर्णध्वजारोहणम् | — तीन रंग के झण्डे का फहराना |
| प्रस्तोतुम् | — प्रस्तुत करने के लिए | | |

| | | |
|---|---|---|
| सार्वभौमतन्त्रम् | — | भारत की सम्पूर्ण भूमि पर अपना शासन |
| प्रतिज्ञास्वप्नः | — | प्रतिज्ञा रूपी स्वप्न |
| स्वस्ति | — | कल्याण हो |

## अभ्यासः

### 1. एकपदेन उत्तरं लिखत—

क. कस्मिन् मासे गणतन्त्रदिवसः भवति?

ख. सेनानायकानाम् अभिवन्दनं कः स्वीकरोति?

ग. राज्येषु/राज्यराजधानीषु अभिवन्दनं के स्वीकुर्वन्ति?

घ. प्रथमं कस्मिन् अधिवेशने त्रिवर्णध्वजारोहणं कृतम्?

ङ. प्रतिज्ञास्वप्नः कस्मिन् वर्षे साक्षात्कृतः?

### 2. एकवाक्येन उत्तरं लिखत—

क. सभाकक्षे कस्य गीतस्य पूर्वाभ्यासः प्रचलति?

ख. भारतस्य राष्ट्रियपर्वणी के?

ग. कस्मिन् दिनाङ्के वयं स्वतन्त्रतादिवसम् आयोजयामः?

घ. राष्ट्रभक्तैः का प्रतिज्ञा कृता?

ङ. कलाकाराः किं कुर्वन्ति?

### 3. प्रदत्तैः शब्दैः प्रश्ननिर्माणं कुरुत—

(किं, कथं, कः, कैः, कुत्र)

यथा— जनवरिमासस्य <u>षड्विंशे</u> दिनाङ्के गणतन्त्रदिवसम् आचरामः।

जनवरिमासस्य <u>कस्मिन्</u> दिनाङ्के गणतन्त्रदिवसम् आचरामः?

क. गणतन्त्रदिवसः <u>राष्ट्रियं पर्व</u> वर्तते।

ख. भू-जल-वायुसेनानां प्रदर्शनं <u>चित्ताकर्षकं</u> भवति।

ग. दिल्लीनगरे <u>राष्ट्रपतिः</u> सेनानायकानाम् अभिवन्दनं स्वीकरोति।

घ. कलाकाराः <u>नृत्यैः</u> जनमनांसि रञ्जयन्ति।

ङ. <u>लाहौराधिवेशने</u> प्रथमवारं त्रिवर्णध्वजारोहणं जातम्।

4. **रिक्तस्थानानि पूरयत—**

(रञ्जयन्ति, सेनानायकानाम्, गणतन्त्रदिवसः, राज्यपालाः, स्वशासनाधारेण)

क. राष्ट्रपतिः ................. अभिवन्दनं स्वीकरोति।

ख. कलाकाराः जनमनांसि ................।

ग. जनवरिमासस्य षडविंशे दिनाङ्के .............. भवति।

घ. भारतं ................ रचितानां राज्यानां गणरूपं वर्तते।

ङ. राज्येषु ................ प्रातिनिध्यं वहन्ति।

5. **उचितं योजयत—**

| | (अ) | (ब) |
|---|---|---|
| क. | राज्यम् | जनगणमन–अधिनायक जय हे |
| ख. | कला | उड्डयन्ते |
| ग. | राष्ट्रियं गीतम् | राज्यपालः |
| घ. | विमानानि | कलाकारः |
| ङ. | राष्ट्रगानम् | वन्दे मातरम् |

6. **विशेषणपदानि उपयुज्य दश वाक्यानि लिखत—**

**मातरं वन्दे**

यथा— सुखदां मातरं वन्दे।

7. **सन्धिम् अथवा सन्धिविच्छेदं कुरुत—**

| | | |
|---|---|---|
| क. | स्वतन्त्रतादिवस इव | ....................। |
| ख. | निस्सारयन्तीति | ...................। |
| ग. | ..................... | इति + अस्य |
| घ. | सोऽयम् | ........................ |
| ङ. | अधुनावगतम् | ......................... |

8. **अव्ययानि चित्वा लिखत—**

क. कथं चलति पूर्वाभ्यासः?

ख. राष्ट्रगानं राष्ट्रगीतं च अभ्यसामः।


ग. अत्र महोत्सवे पथचलनं भवति।

घ. त्रिवर्णध्वजारोहणम् अपि कृतम्।

ङ. अधुना अवगतम् अस्माभिः।

**योग्यताविस्तारः —**

- आकाशवाणीद्वारा गणतन्त्रदिवसस्य प्रसारणं श्रुत्वा दूरदर्शनद्वारा दृष्ट्वा वा पञ्च वाक्यानि लिखत।
- चित्रं दृष्ट्वा पञ्चवाक्यैः मातृभूमेः वर्णनं कुरुत।




- विविधभाषासु राष्ट्रभक्तिगीतानि सङ्कलय्य तदवसरे तालबद्धं गायत।
- दिनाङ्कानां संस्कृतशब्दरूपेण पठनार्थं लेखनार्थं च अभ्यासं कुरुत।

| | | | |
|---|---|---|---|
| उदाहरणम्— | 1929 | — | नवविंशत्यधिकनवदशशतकम्। |
| | 26 जनवरी | — | जनवरिमासस्य षड्विंशः दिनाङ्कः। |

**जयतु गणतन्त्रम्।**